# .. Suryastotra by Sage Yagnyavalkya ..

## ॥ श्रीयाज्ञवल्क्यकृतं श्रीसूर्यस्तोत्रं ॥

॥ श्रीगुरुभ्यो नमः॥

॥ ॐ श्रीमहागणाधिपतये नमः ॥

ॐ नमो भगवते आदित्यायाखिलजगतां आत्मस्वरूपेण कालस्वरूपेण
चतुर्विधभूत-निकायानां ब्रह्मादिस्तम्भ-पर्यन्तानां
अन्तर्हृदयेषु बहिरपि चाकाश इव उपाधिनाऽव्यवधीयमानो
भवानेक एव क्षणलव-निमेषावयवोपचित-संवत्सरगणेन
अपा-मादान-विसर्गाभ्यां इमां लोकयात्रां अनुवहति ॥ १

यदुह वाव विबुधर्षभ सवितरदस्तपत्यनुसवनं अहरहः
आम्नायविधिना उपतिष्ठमानानां अखिल-दुरित-वृजिनबीजावभर्जन
भगवतः समभिधीमहि तपनमण्डलम् ॥ २

य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मन-इन्द्रियासुगणान्
अनात्मनः स्वयमात्मा अन्तर्यामी प्रचोदयति ॥ ३

य एवेमं लोकं अतिकरालवदनान्धकार-संज्ञा-जगरग्रह-गिलितं
मृतकमिव विचेतनं अवलोक्यानुकम्पया परमकारुणिकः ईक्षयैव
उत्थाप्य अहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने
प्रवर्तयति अवनिपतिरिवासाधूनां भयमुदीरयन्नटति ॥ ४

परित आशापालैस्तत्र तत्र कमलकोशाञ्जलिभिः उपहृतार्हणः ॥ ५

अथह भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितं
अहं अयातयामयजुःकामः उपसरामीति ॥ ६

एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः ॥ ७

॥ इति श्रीमद्भागवते द्वादशस्कन्धे श्रीयाज्ञवल्क्यकृतं
श्रीसूर्यस्तोत्रं संपूर्णम् ॥

Note: This Stuti appears in the 12th Skandham (6th Adhyaya)
of Shreemad BhAgavatham. Maharishi Yagnavalkya praised Shree Surya
Bhagavan through this Stuti, to earn his grace and for obtaining the

till-then-unknown Shukla Yajurveda Mantras or AyAta-YAmam, as it is referred to in Shastras. This Stuti eloquently describes how Surya Bhagavan single-handedly protects this entire Cosmos by his never-ending Loka Yatra and the Vedic religion and Bhagavan's unfailing grace to those who steadfastly follow the Dharma, as laid down in the Vedas/Shastras.